केन्द्रीय-विद्यालय-संगठनम् , अहमदाबाद-सम्भाग:

द्वितीय-पूर्व-परिषदीय-परीक्षा 2018-19

कक्षा- दशमी

समय: 3:00 घण्टात्मक: * विषय: - संस्कृतम् ( 122 )

* सम्पूर्णाङ्का: - 80

**सामान्यनिर्देशा: -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 8 पृष्ठानि मुद्रितानि सन्ति |
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 16 प्रश्ना: सन्ति |
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय: |
- अस्य प्रश्नपत्रस्य पठानाय 15 निमेषा: निर्धारिता: सन्ति | अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयानि |

**प्रश्नपत्रस्वरूपम् –**

| | | |
|---|---|---|
| खण्ड: (क) | : अपठितांश-अवबोधनम् | 10 अङ्का: |
| खण्ड: (ख) | : रचनात्मककार्यम् | 15 अङ्का: |
| खण्ड: (ग) | : अनुप्रयुक्तव्याकरणम् | 25 अङ्का: |
| खण्ड: (घ) | : पठित-अवबोधनम् | 30 अङ्का: |

(i) अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति |

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि |

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया |

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि |

(v) प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया: |

---

**खण्ड: (क) : अपठितांश-अवबोधनम्** **10 अङ्का:**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**

कृष्णद्वैपायन: महर्षे: पराशरस्य पुत्र: आसीत् | अस्य माता 'सत्यवती' आसीत् | कृष्णद्वैपायनस्य जन्म एकस्मिन् द्वीपे अभवत् | अस्य वर्ण: कृष्ण: आसीत् | अत: अयं कृष्णद्वैपायन: कथ्यते | अनेनैव वेदानां सङ्कलनं कृतम् | अत एवायं वेदव्यास: इति नाम्ना प्रसिद्ध: जात: | महाभारतकाले स: विद्यमान: आसीत् | स एव 'महाभारतम्' अरचयत् | महर्षि: वेदव्यास: अष्टादश पुराणानि अपि अरचयत् | विदुषां मतमस्ति यत् महर्षिणा व्यासेन 'पुराणसंहिता' नाम ग्रन्थो रचित: | पश्चात् तेषां शिष्यै: अनेकानि पुराणानि विरचितानि |

**अ. एकपदेन उत्तरत – ( केवलं प्रश्नचतुष्टयम् )** **½ x 4 = 2**

(क) महर्षे: वेदव्यासस्य पिता क: आसीत् ?

(ख) कृष्णद्वैपायनस्य जन्म कुत्र अभवत् ?

(ग) महर्षे: वेदव्यासस्य माता का आसीत् ?

(घ) वेदव्यासेन केषां सङ्कलनं कृतम् ?

(ङ) कस्मिन् काले स: विद्यमान: आसीत् ?



Scanned by CamScanner

आ. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) विदुषां मतं किम् अस्ति ?
(ख) किमर्थं कृष्णद्वैपायन: 'वेदव्यास:' इति नाम्ना प्रसिद्ध: अभवत् ?
(ग) महर्षि: वेदव्यास: कति पुराणानि अरचयत् ?

इ. निर्देशानुसारम् उत्तरत – (केवलं प्रश्नचतुष्टयम्) 1 x 4 = 4

(क) **'अस्य वर्ण: कृष्ण: आसीत्'** अत्र किं पदं क्रियापदम् ?
(i) वर्ण: (ii) आसीत् (iii) कृष्ण: (iv) अस्य
(ख) **'महाभारतकाले स: विद्यमान: आसीत्'** इति अस्मिन् वाक्ये 'स:' इति सर्वनाम कस्मै प्रयुक्त: ?
(i) कृष्णाय (ii) महाभारताय (iii) पराशराय (iv) वेदव्यासाय
(ग) **'पुराणानि'** इति अस्य विशेष्यपदस्य विशेषणपदं किम् ?
(i) अनेकानि (ii) पुस्तकानि (iii) महर्षिणा (iv) अस्य
(घ) **'श्वेत:'** इति अस्य पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?
(i) वर्ण: (ii) वेदव्यास: (iii) कृष्ण: (iv) शिष्य:
(ङ) **'पुस्तकम्'** इति अस्य पदस्य किं समनार्थकपदं गद्यांशे प्रयुक्तम् ?
(i) मतम् (ii) माता (iii) प्रसिद्ध: (iv) ग्रन्थ:

ई. अस्य गद्यांशस्य कृते उचितं शीर्षकं लिखत। 2 x 1 = 2

---

**खण्ड: (ख) : रचनात्मककार्यम्**

15 अङ्का:

**2. भवत: नाम सुयश:। भवत: विद्यालये संस्कृतनाटकस्य मञ्चनं भविष्यति। तदर्थं स्वमित्रं विवेकं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तपदै: रिक्तस्थानानि पूरयत –** ½ x 10 = 5

केन्द्रीय-विद्यालय: ई.एम.ई.
बड़ौदात:
दिनांक: - ....................


प्रियमित्र .................... (1)
दीपोत्सवस्य ........................ (2)। अत्र सर्वं ........................(3)। भवान् अपि कुशली इति मन्ये। अस्माकं विद्यालयस्य ........................ (4) सोमवासरे भविष्यति। तस्मिन् कार्यक्रमे 'अभिज्ञानशान्कुतलम्' इति अस्य ............... (5) मञ्चनं भविष्यति। अहं तस्मिन् नाटके नायकस्य अभिनयं ................ (6)। भवान् तत् द्रष्टुं ..................... (7) आगच्छतु। मम अपि उत्साहवर्धनं ........................ (8)। सर्वेभ्य: अग्रजेभ्य: मम ............................ (9)।
भवत: सुहृद्
................ (10)

| | | | | | |
|---|---|---|---|---|---|
| सुयश: , | अवश्यमेव , | करिष्यामि , | नाटकस्य , | वार्षिकोत्सव: , | शुभाशया: , |
| प्रणामाञ्जलि: , | कुशलं , | विवेक! , | भविष्यति | | |



Scanned by CamScanner

3. अत्र प्रदर्शित-चित्रं दृष्ट्वा मञ्जूषातः पदानि विचित्य पञ्चवाक्यानि रचयत - 2 x 5 = 10



मञ्जूषा-

| | | | | | | |
|---|---|---|---|---|---|---|
| घूमर-नृत्यम् , | बालिका: , | राजस्थानस्य , | लोक-नृत्यम् , | दर्शका: , | अस्ति , | प्रसिद्धम् , |
| कुर्वन्ति , | ग्राम: , | वृक्षा: , | उत्साहवर्धनम् | | | |

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयं अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत**

**'वनानां महत्त्वम्'**

मञ्जूषा-

| | | | | | | |
|---|---|---|---|---|---|---|
| प्रकृतेः शोभा: , | सहायका: , | छायां , पर्यावरणस्य , | यच्छन्ति , | रक्षका: , | प्राणवायुम् , | |
| काष्ठं , | फलानि , | मेघवर्षणे , | खगानां , | वन्यजीवानां , | आश्रयस्थलम् | |

---

**खण्डः (ग) : अनुप्रयुक्तव्याकरणम्** **25 अङ्काः**

**4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं संधिविच्छेदं वा कुरुत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

(i) त्वं तस्य **मनः+वृत्तिं** न जानासि |

(ii) उत्तरपुस्तिकायाम् एकम् **अनुच्छेदं** लिखत |

(iii) **देव+ऋषिः** आगच्छति |

(iv) विद्यया भान्ति **सत्+गुणा:** |

(vi) सैनिकः राष्ट्रस्य **नयनं** मन्यते |

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं समासविग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -**

**( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

(i) **प्रच्छन्नभाग्यः** स्वपत्नीं संबोध्य उवाच |

(क) प्रच्छन्न भाग्यम् (ख) गुप्त भाग्यः

(ग) प्रच्छन्नं भाग्यं यस्य सः (घ) प्रच्छन्नम् च भाग्यम् च

(ii) भोजनात् पूर्वम् अहं **पाणिपादं** प्रक्षालयामि |

(क) पाणिपादौ (ख) पाणि च पादं च

(ग) पाणि पादं समाहारः (घ) पाणी च पादौ च एषां समाहारः

(iii) **वृद्धान् उपसेवितुं शीलं यस्य सः** नृपः दानशीलः आसीत् |



Scanned by CamScanner

(क)वृद्धोपसेवी (ख) वृद्ध ऊपसेवी

(ग) वृद्धोपसेवि (घ) वृद्धोपसेविन:

(iv) अहं सर्वदा **यथासमयं** विद्यालयं गच्छामि।

(क) समयं विनां (ख) समयं दृष्ट्वा

(ग) समयम् अनतिक्रम्य (घ) समय: अनतिक्रम्य

(v) विवेकेन **तत्त्वार्थस्य निर्णय:** क्रियते।

(क) तत्त्वार्थो निर्णय: (ख) निर्णयस्य तत्वार्थ:

(ग) निर्णयतत्त्वार्थ: (घ) तत्त्वार्थनिर्णय:

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं प्रदत्त-विकल्पेभ्य: चित्वा लिखत -** **( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

(i) अस्माभि: पुस्तकं **पठनीयम्**।

(क) पठ् + अनीयर् (ख) पठ् + नीयम् (ग) पठनी + यम्

(ii) **बुद्धि + मतुप्** सर्वत्र पूज्यते।

(क) बुद्धिवान (ख) बुद्धिशाली (ग) बुद्धिमान्

(iii) कर्मशील: **योगी** कथ्यते।

(क) योगि + इनि (ख) योग + मतुप् (घ) योग + इनि

(iv) अभ्यासेन **सन्तुष्ट + टाप्** सरस्वती कृपां करोति।

(क) सन्तुष्टम् (ख) सन्तुष्टा (ग) सन्तुष्ट:

(v) **मूढता** नैव श्लाघनीया।

(क) मूढ + अता (ख) मूढत + आ (ग) मूढ + तल्

**7.मञ्जूषायां प्रदत्तै: पदै: वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुन: लिखत -** **1 x 3 = 3**

कृष्ण: - मोहन ! अद्य तव गृहे क: आगच्छति।

मोहन: - मित्र ! मम गृहे अद्य (i) ........................ आगम्यते।

कृष्ण: - संस्कृत-शिक्षक: ! स: किमर्थम् (ii)................................ ।

मोहन: - संस्कृत-नाटके (iii) ...................... श्रेष्ठम् अभिनयं कृतम् अत: मम अभिनन्दनार्थम् आगच्छति।

कृष्ण: - सत्यं खलु ! एतत् तु बहुशोभनम्। अभिनन्दनं मित्र !

**मञ्जूषा -**

| | | |
|---|---|---|
| आगच्छति , | मया , | संस्कृत-शिक्षकेन |

**अथवा**

**अधोलिखितानां वाक्यानां वाक्यानां वाच्यपरिवर्तनं कुरुत –**

(क) बालका: संस्कृतं पठन्ति।

(ख) प्राचार्येण पारितोषिकं दीयते।

(ग) बालिका श्लोकं लिखति।

**8. कालबोधकशब्दै: अधोलिखित-दिनचर्यायां रिक्तस्थानानि पूरयत - ( केवलं प्रश्नचतुष्टयम् ) ½ x 4 = 2**

(क) राघव: प्रभाते ( 5:00 ) .................... वादने उत्तिष्ठति।

(ख) स: ( 5:45 ) .......................... वादने स्नानं करोति।

(ग) स: ( 7:30 ) ............................ वादने प्रातराशं करोति।



Scanned by CamScanner

(घ) सः ( 9:00) ............................ वादने कार्यालयं गच्छति |
(ङ) सः ( 11:15 ) ......................... वादने वित्तकोषं गच्छति |

**9. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः रिक्तस्थानानि पूरयत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

(क) यावत् एतस्य बालस्य माता न आगच्छति ............... एषः रोदिति |
(ख) संस्कृतम् ...................... अस्माकं संस्कृतेः रक्षां करिष्यति |
(ग) सूपकाराणां मेषेण .............. एषः कलहः नूनं भवतां विनाशकारणं भविष्यति |
(घ) पुत्रशोकसन्तप्ताः युधिष्ठिरः भीमः द्रौपदी .............. रणभूमौ प्रविशन्ति |
(ङ) मनसः निग्रहः वायोः ................ दुष्करः भवति |

मञ्जूषा -

| |
|---|
| सह , इव , तावत् , एव , च |

**10. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति | अशुद्धं पदं संशोध्य पुनः लिखत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

(क) त्वं कुत्र **गच्छति** ?
(ख) छात्राः समवेत-स्वरेण श्लोकं **गायति** |
(ग) उद्याने **सुन्दराः** पुष्पाणि विकसन्ति |
(घ) **वयं** सोमवासरे शिवमन्दिरं गच्छामि |
(ङ) हिन्दीकाव्यपाठ-प्रतियोगिता ह्यः **भविष्यति** |

---

**खण्डः (घ) : पठित-अवबोधनम्** **30 अङ्काः**

**11. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 6**

मम कलनस्य तु आधारः सूर्य एव | सूर्यस्य द्वे गती उत्तरायणं दक्षिणायाश्च | प्रत्येकस्य अयनस्य अवधिः षण्मासाः भवन्ति | भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि | पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य मासस्य नाम भवति | यथा चैत्रे मासे पूर्णिमा चित्रानक्षत्रयुता भवति , अतः तस्य मासस्य नाम 'चैत्रः' भवति | षड्ऋतवः एव मे नाभयः |. द्वादशमासाः एव अक्षत्वेन गण्यन्ते | चतुर्विंशतिः पक्षा एव पर्वाणि भवन्ति | षष्ट्युत्तरत्रिशतानि दिनानि एव अराणि |

**अ. एकपदेन उत्तरत – ( केवलं प्रश्नद्वयम् )** **1 x 2 = 2**

(क) द्वादशमासाः केन गण्यन्ते ?
(ख) प्रत्येकस्य अयनस्य अवधिः कति मासाः भवन्ति?
(ग) काः कालस्य नाभयः ?

**आ. पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नमेकम् )** **2 x 1 = 2**

(क) केषां नामानि नक्षत्रनामभिः सम्बद्धानि ?
(ख) केन नाम्ना तस्य मासस्य नाम भवति ?



Scanned by CamScanner

इ. निर्देशानुसारम् उत्तरत – ( केवलं प्रश्नचतुष्टयम् ) ½ x 4 = 2

(क) **'चतुर्विंशतिः पक्षा एव पर्वाणि भवन्ति'** अत्र किं पदं क्रियापदम् ?

(i) पक्षा (ii) एव (iii) भवन्ति

(ख) **'मम कलनस्य तु आधारः सूर्य एव'** इति अस्मिन् वाक्ये 'मम' इति सर्वनाम कस्मै प्रयुक्तः ?

(i) कालाय (ii) सूर्याय (iii) मासाय

(ग) **'अयनस्य'** इति अस्य विशेष्यपदस्य विशेषणपदं किम् ?

(i) दिनानि (ii) प्रत्येकस्य (iii) अवधिः

(घ) **'निराधारः'** इति अस्य पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(i) अवधिः (ii) गती (iii) आधारः

(ङ) **'रविः'** इति अस्य पदस्य किं समनार्थकपदं गद्यांशे प्रयुक्तम् ?

(i) सूर्यः (ii) दिनानि (iii) नक्षत्रम्

**12. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 6**

**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ।**
**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ॥**

अ. एकपदेन उत्तरत – ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

(क) कामः कस्मात् सञ्जायते ?

(ख) कामात् कः अभिजायते ?

(ग) स्मृतिविभ्रमः कस्मात् जायते ?

आ. पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नमेकम् ) 2 x 1 = 2

(क) क्रोधात् कः भवति ?

(ख) अस्मिन् श्लोके श्रीकृष्णः कं सम्बोधयति ?

इ. निर्देशानुसारम् उत्तरत – ( केवलं प्रश्नचतुष्टयम् ) ½ x 4 = 2

(क) **'कामात्क्रोधोऽभिजायते'** अत्र किं पदं क्रियापदम् ?

(i) अभिजायते (ii) कामात् (iii) क्रोधः

(ख) **'सङ्गात्सञ्जायते कामः'** इति अस्मिन् वाक्ये किं पदं कर्तृपदम् ?

(i) सङ्गात् (ii) सञ्जायते (iii) कामः

(ग) **'क्रोधाद्भवति सम्मोहः'** इति अस्मिन् वाक्ये किं पदं कर्तृपदम् ?

(i) क्रोधात् (ii) भवति (iii) सम्मोहः

(घ) **'कोपात्'** इति अस्य पदस्य किं समनार्थकपदं पद्यांशे प्रयुक्तम् ?

(i) सङ्गात् (ii) कामात् (iii) क्रोधात्

(ङ) **'आसक्तेः'** इति अस्य पदस्य किं समनार्थकपदं पद्यांशे प्रयुक्तम् ?

(i) सङ्गात् (ii) कामात् (iii) क्रोधात्

**13. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 6**

**युधिष्ठिरः** - सम्प्रति आश्वस्तः अस्मि | मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति |

**श्रीकृष्णः** - तर्हि न जानासि तस्य मनोवृत्तिम् | पितुः उपदेशेन असन्तुष्टः स एकदा द्वारकापुरीम् आगच्छत् | ब्रह्मास्त्रं दत्त्वा सः सुदर्शनचक्रम् अवाञ्छत् |



Scanned by CamScanner

**युधिष्ठिर:** - ( साश्चर्यम् ) कथं चक्रम् इति ।

**श्रीकृष्ण:** - आम् ! मया कथितम् । नाहं त्वत्तः ब्रह्मास्त्रम् इच्छामि । यदि त्वं गदां शक्तिं धनुः चक्रं वा इच्छसि तुभ्यं ददामि ।

**युधिष्ठिर:** - ततस्ततः ।

**श्रीकृष्ण:** - स तु चक्रम् एव अयाचत् । गृहाण चक्रम् इति उक्तः सः सव्येन पाणिना चक्रं गृहीतवान् किन्तु सः तत् चक्रं स्वस्थानात् सञ्चालयितुम् अपि समर्थः न अभवत् ।

**अ. एकपदेन उत्तरत – ( केवलं प्रश्नद्वयम् )** **1 x 2 = 2**

(क) ब्रह्मास्त्रं दत्त्वा सः किम् अवाञ्छत् ?

(ख) स तु किम् अयाचत् ?

(ग) सः केन पाणिना चक्रं गृहीतवान् ?

**आ. पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नमेकम् )** **2 x 1 = 2**

(क) केन असन्तुष्टः स एकदा द्वारकापुरीम् आगच्छत् ?

(ख) सः किं स्वस्थानात् सञ्चालयितुम् अपि समर्थः न अभवत् ?

**इ. निर्देशानुसारम् उत्तरत – ( केवलं प्रश्नचतुष्टयम् )** **½ x 4 = 2**

(क) **'त्वं गदां शक्तिं धनुः चक्रं वा इच्छसि'** अत्र किं पदं क्रियापदम् ?

(i) त्वं (ii) इच्छसि (iii) धनुः

(ख) **'त्वं गदां शक्तिं धनुः चक्रं वा इच्छसि'** इति अस्मिन् वाक्ये किं पदं कर्तृपदम् ?

(i) गदां (ii) शक्तिं (iii) त्वं

(ग) **'सव्येन'** इति अस्य विशेषणपदस्य किं विशेष्यपदं अस्मिन् नाट्यांशे प्रयुक्तम् ?

(i) पाणिना (ii) चक्रं (iii) उक्तः

(घ) **'सक्षमः'** इति अस्य पदस्य किं समनार्थकपदं नाट्यांशे प्रयुक्तम् ?

(i) आश्वस्तः (ii) समर्थः (iii) शक्तिम्

(ङ) **'सन्तुष्टः'** इति अस्य पदस्य किं विलोमपदं नाट्यांशे प्रयुक्तम् ?

(i) धनुः (ii) समर्थः (iii) असन्तुष्टः

**14. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - ( केवलं प्रश्नचतुष्टयम् )** **1 x 4 = 4**

(क) राजा <u>वैद्यान्</u> आहूय अश्वरक्षार्थम् अपृच्छत् ।

(ख) <u>दानशालासु</u> विचरन् राजा अचिन्तयत् ।

(ग) <u>जलबिन्दुनिपातेन</u> क्रमशः घटः पूर्यते ।

(घ) <u>अहम्</u> एव सर्वेषां पक्षिणां जननी अस्मि ।

(ङ) संसारे विद्वांसः <u>ज्ञानचक्षुर्भिः</u> नेत्रवन्तः कथ्यन्ते ।



Scanned by CamScanner

15. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत - ½ x 8 = 4

(क) नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः ।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥

अन्वयः - विद्यासमं (i) ...................... न अस्ति , सत्यसमं तपः न (ii) ...................... । रागसमं दुःखं (iii) ............... अस्ति , (iv) .................... सुखं न अस्ति ।

(ख) य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।
न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥

अन्वयः - यः (v) ............. श्रेयः प्रभूतानि (vi) ..................... च इच्छन्ति , सः (vii) ................ अहितं कर्म कदापि न (viii) .............................।

मञ्जूषा -

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अस्ति | कुर्यात् | न | परेभ्यः | चक्षुः | त्यागसमं | सुखानि | आत्मनः |

16. अधोलिखितकथनेषु रेखाङ्कितपदानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत –

( केवलं प्रश्नचतुष्टयम् ) 1x4 = 4

(i) **ज्वालमालाकुला:** अश्वाः प्राणत्राणाय इतस्ततः अधावन् ।

(क) धावनेन श्रान्ताः (ख) पिपासया व्याकुलाः (ग) अग्निज्वालासमूहेन पीडिताः

(ii) गृहे तस्य भार्या सपदि समागतं पतिं **दृष्ट्वा** अपृच्छत् –

(क) वीक्ष्य (ख) प्रश्नं कृत्वा (ग) दत्वा

(iii) **निःसारलघुधनं** लोकहिताय दातव्यम् ।

(क) चञ्चलं धनं (ख) सारहीनं धनं (ग) उचितं धनम्

(iv) अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः **पिकाः** ।

(क) काकाः (ख) कोकिलाः (ग) कपोताः

(v) भगवन् किं किम् **उपादेयं** भवति ?

(क) लाभकरं (ख) उत्पादनं (ग) सततम्

*****************************************************************



Scanned by CamScanner